MSS No. 251 Subject Philosophy

Name of MSS न्यायबोधिनी Nyāyabodhini

Author गोवर्धन

Period ______ Folios —

Script Sanskrit Source Prithipal Singh

Missing Folios —

तर्क संग्रह-न्याय बोधिनी

[illegible]

[illegible]

न्यायबोधिनी ; तर्कसंग्रह
व्याख्या ; गोवर्धन कृत ॥
१२ पत्रक ॥ ल० अ० १२ पं० प्र० पृ०

ह० लि०




PUNJAB UNIVERSITY
LIBRARY

न्याय॰
९

श्रीगणेशायनमः अखिलागमसंचारिश्रीकृष्णाख्यं परं महः ज्ञात्वा गोवर्द्धनसुधीस्तनुते न्यायबोधिनीम् १ चिकीर्षितस्य ग्रंथस्य
निर्विघ्नपरिसमाप्त्यर्थं इष्टदेवतानमस्कारात्मकं मंगलं शिष्यशिक्षार्थं ग्रंथतो निबध्नाति निधायेति अथ पदार्थान् विभजते द्रव्ये
ति अत्र सप्तग्रहणं पदार्थत्वं द्रव्याद्यन्यतमत्वव्याप्यमिति व्याप्तिलाभाय ननु शक्तिः पदार्थस्य अष्टमस्य सत्वात्कथं सप्तैवेति तथा
हि वह्निसंयुक्तेन्धनादौ सत्यपि मणिसंयोगे दाहो न ज[illegible]तेजके सूर्ये जायते अतो मणिसमवधाने शक्तिर्नश्यति मण्यभाववद्दशायां
दाहानुकूला शक्तिरुत्पद्यते इति कल्प्यते तस्माच्छक्तिरतिरिक्तः पदार्थ इति चेन्न मणेः प्रतिबंधकत्वेन तदभावस्य कारणत्वेनैव वह्नि
दाहे मणिसमवधानासमवधानाभ्यामनंतशक्तिध्वंसकल्पनाया अन्याय्यत्वात् तस्मात्सप्तैव पदार्था इति द्रव्याणि विभजते
पृथिवीति ननु अंधकारस्य दशमद्रव्यस्य सत्वात्कथं नवैवेति तथाहि नीलं तमश्चलतीति प्रतीतेर्नीलरूपाश्रयत्वेन क्रियाश्र
यत्वेन च द्रव्यत्वं सिद्धम् न च [illegible]रूपद्रव्येष्वंतर्भावात्कुतो दशमद्रव्यत्वमिति वाच्यम् आकाशपंचकस्य निरूपत्वाद्वायोरपि
न तेष्वंतर्भावः तमसो निर्गंधत्वान्न पृथिव्यामंतर्भावः संभवति जलतेजसोः शीतोष्णस्पर्शवत्वान्न तयोरंतर्भावः तस्मात्तम
सो दशमद्रव्यत्वं सिद्धमिति चेन्न तेजसोऽभावेनैवोपपत्तौ अतिरिक्तकल्पनायां मानाभावात् न च विनिगमनाविरहात्तेजएव
अंधकाराभावस्वरूपमिति वाच्यम् तेजसोऽभावस्वरूपते सर्वानुभूतोष्णस्पर्शस्याश्रयबाधात् द्रव्यांतरकल्पने गौरवात्

दि ४
राम॰
९

तस्मादुष्णस्पर्शगुणाश्रयतया तेजसो लक्षणत्वं सिद्धम् तमसि नीलरूपप्रतीतिस्तु भ्रान्तिरेव दीपापसरणक्रियायाः एव तत्र भानात्
गंधवतीति गंधवत्वं पृथिव्या लक्षणं पृथिवीलक्ष्या पृथिवीत्वं लक्ष्यतावच्छेदकं यद्धर्मावच्छिन्ने लक्ष्यं स धर्मो लक्ष्यतावच्छे-
दकः यो धर्मो यस्यामवच्छेदकः सा तद्धर्मावच्छिन्ना तथा च लक्ष्यतावच्छेदके पृथिवीत्वे च लक्ष्यता पृथिवीतावच्छिन्ना एवं
शीतस्पर्शवत्वादिलक्षणेषु जलादीनां लक्ष्यता जलत्वादिनावच्छेदकत्वं बोध्यम् स्वेपृथिव्यादिकं निरूप्य वायुं निरूपयति।
रूपरहितेति रूपरहितत्वे सति स्पर्शवत्वं वायोर्लक्षणम् सतिसप्तम्या विशिष्टार्थकं तया रूपरहितत्वविशिष्टस्पर्शवत्वं वायोर्लक्षण-
म् विशेषणानुपादाने स्पर्शवत्वमात्रस्य लक्षणत्वे पृथिव्यादित्रिके अतिव्याप्तिः तत्रापि स्पर्शवत्वस्य सत्वात् अत उक्तं स्या दिते
ति अतिव्याप्तिर्नाम अलक्ष्ये लक्षणसत्वं यथा गोः शृंगित्वं लक्षणं कृते चेत् लक्ष्यभूतगोभिन्ने महिषादौ अतिव्याप्तिस्तत्रापि शृं-
गित्वस्य विद्यमानत्वात् अव्याप्तिर्नाम लक्ष्यैकदेशावृत्तित्वं यथा गोर्नीलरूपवत्वं लक्षणं कृते चेत् लक्ष्यैकदेशावृत्तित्वं नाम ल-
क्ष्यतावच्छेदकाश्रयभूते क्वचिल्लक्ष्ये लक्षणस्याभावः असत्वमेवाव्याप्तिरित्यर्थः श्वेतगवि नीलरूपवत्वस्याभावात् असंभ-
वो नाम लक्ष्यमात्रे कुत्रापि लक्षणासत्वं यथा गोरेकशफत्वं गोसामान्यस्य द्विशफत्वेनैक तद्वत्वेनैकशफत्वाभावात् अतिव्याप्त्यव्या-
वे २ प्त्यसंभवानां निरुक्तलक्षणं लक्ष्यतावच्छेदकसमानाधिकरणत्वे सति समानाधिकरणात्यन्ताभावप्रतियोगित्वं अव्याप्ति-
स्तु लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वं असंभवस्तु लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वं केचि-
ततत्तावच्छेदकावच्छिन्नप्रतियोगिताकभेदसमानाधिकरणमतिव्याप्तिः २

कृ २

न्या०प० शब्दं लक्षयति शब्दगुणमिति अत्र गुणपदं आकाशे शब्दस्य विशेषगुण इति द्योतनाय न त्वतिव्याप्तिवारणाय समवायेन शब्द
२ वत्वमात्रस्यैव सम्यक्त्वात् तदुक्तम् रूपं गंधो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः बुद्ध्यादिभावनांतांश्च शब्दो वैशेषिको गुणा इति
तद्वैशेषिकमिति अनेकत्वे मानाभावादिति भावः विभ्विति सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वं मूर्तत्वं च क्रियाश्रयत्वं पृथिव्यप्तेजो
वायुमनांसि मूर्तानि पृथिव्यप्तेजोवाय्वाकाशपंचकं भूतपदवाच्यम् भूतत्वं नाम बहिरिंद्रियग्राह्यविशेषगुणवत्त्वं कालं
लक्षयति अतीतेति व्यवहारहेतुत्वस्य लक्षणत्वे घट इति व्यवहारहेतुभूतघटादावतिव्याप्तिस्तद्वारणायातीतेति विशेषणोपा
दानम् दिशो लक्षणमाह प्राचीति उदयाचलसंयुक्ता दिक् प्राची अस्ताचलसंयुक्ता दिक् प्रतीची मेरोः संनिहिता दिगुदी
ची मेरोर्व्यवहिता दक्षिणा आत्मानं निरूपयति ज्ञानाधिकरणमिति अधिकरणपदं समवायेन ज्ञानलाभार्थम् मनो निरूपय
ति सुखादीति उपलब्धिर्नाम साक्षात्कारः तथा च सुखादिसाक्षात्कारकरणत्वे सति इंद्रियत्वं मनसो लक्षणं केवलं इंद्रि
यत्वमात्रोक्तौ चक्षुरादावतिव्याप्तिः अतः पूर्वदलविशेष्यानुपादाने आत्मन्यतिव्याप्तिः आत्मनो ज्ञानादिकं प्रति समवा
यिकारणत्वात् अत इंद्रियत्वरूपविशेष्योपादाने रूपं लक्षयति चक्षुर्मात्रेति चक्षुर्मात्रग्राह्यत्वविशिष्टगुणत्वं रूपस्य लक्ष
णं विशेष्यमात्रोपादाने रसादावतिव्याप्तिः अतः चक्षुर्मात्रग्राह्येति विशेषणं तावन्मात्रोपादाने रूपत्वेतिव्याप्तिः बोगुणे परि राम० २

द्रियेण ग्रहणे तन्निष्ठजातिरपि तदिन्द्रियेण गृह्यते अतस्तद्वारणाय विशेष्योपादाने चक्षुर्मात्रग्राह्यत्वे नाम चक्षुर्भिन्नेन्द्रिया
ग्राह्यत्वे सति चक्षुर्ग्राह्यत्वम् मात्रपदानुपादाने संख्यादि सामान्यगुणेऽतिव्याप्तिः संख्यादावपि चक्षुर्ग्राह्यत्वविशिष्टगु
णत्वस्य सत्वात् अतस्तत्रातिव्याप्तिवारणाय मात्रपदम् संख्यादेश्चक्षुर्भिन्नग्राह्यत्वात् चक्षुर्मात्रग्राह्यत्वं नास्ति अत्र लक्ष
णे ग्राह्यत्वं नाम लौकिकप्रत्यक्षविषयत्वं अग्राह्यत्वं नाम तदविषयत्वम् तथा च चक्षुर्भिन्नेन्द्रियजन्यलौकिकसाक्षात्काराऽवि
५ प्रत्यक्ष षयत्वे सति चक्षुर्जन्यचाक्षुषविषयत्वमिति फलितोऽर्थः ननु प्रभाघटसंयोगे रूपलक्षणस्यातिव्याप्तिः तस्य चक्षुर्मात्रग्राह्य
स गुणत्वादिति चेन्न गुणपदस्य विशेषणपरत्वात् न चैवं विशेषणघटितलक्षणे संख्यादावतिव्याप्त्यभावान्मात्रं वैयर्थ्यमिति
वाच्यम् जलमात्रवृत्तिसांसिद्धिकद्रवत्वादावतिव्याप्तिवारणाय तदुपादानात् अथवा चक्षुर्मात्रग्राह्यजातिमद्गुणस्य लक्षण
त्वान्न प्रभाघटसंयोगादावतिव्याप्तिः संयोगत्वजातेश्चक्षुर्मात्रग्राह्यत्वाभावात् घटसंयोगस्य त्वगिन्द्रियग्राह्यत्वे तद्वृत्तिजा
ग्राह्यत्वात् तेरपि त्वगिन्द्रिय[illegible]योग्येन्द्रियग्राह्यस्तन्निष्ठजातेरपि तदिन्द्रियग्राह्यत्वादत्र जातिघटितलक्षणे गुणत्वानुपादाने चक्षुर्मा
त्रग्राह्यजातिमति सुवर्णादावतिव्याप्तिस्तद्वारणाय तदुपादानं एवं रसादिलक्षणे विशेषणानुपादाने तत्स्वभिन्नगुणादाव
तिव्याप्तिर्विशेष्यानुपादाने तत्स्वमात्रवृत्तिरसत्वगन्धत्वादावतिव्याप्तिरतो विशेषणविशेष्ययोरुपादानम् सर्वत्र लक्षयति

गुणो ३

त्वलिंगिंगिद्रियमात्रेति अत्रापि मात्रपदं संख्यादिसामान्यगुणादावतिव्याप्तिवारणाय अन्यविशेषणाकृत्यं पूर्ववद्बोध्यम्॥
ग्राह्यत्वपरार्थोपि पूर्ववदेव प्रत्यक्षविषयत्वरूप एव बोध्यः रूपादिचतुष्टयं पृथिव्यां पाकजमिति एतत्तत्वनिर्णयस्त्वेत्थं पाको
नामविजातीयतेजस्संयोगः सच नानाजातीयः रूपजनको विजातीयतेजस्संयोगः तदपेक्षया रसजनको विजातीय एवं स्पर्शे
पि तथैवैवं प्रकारेणाभिन्नाभिन्नजातीयाः पाकाः कार्यवैलक्षण्येन कल्पनीयाः यथात्तृणपुंजनिक्षिप्ते आम्रादावुष्मलक्षणा
विजातीयतेजः संयोगात्पूर्वहरितरूपनाशे नरूपान्तरस्य पीतादेरुत्पत्तिः पूर्वरसस्याम्लस्यैव अनुभवाद्धरितरूपस्य सत्वेपि रस
परावृत्तिदर्शनात् विजातीयतेजस्संयोगरूपवशात्पूर्वं अम्लरसनाशे मधुररसस्यानुभवात्तस्माद्रूपजनकापेक्षया रसजनको
विलक्षण एवं गंधजनकोपि विलक्षण एवंगीकार्यः रूपरसयोरपरावृत्तावपि पूर्वगंधनाशे विजातीयपाकवशात् सुरभिगं
धोपलब्धेः एवं स्पर्शेपि पाकवशात्कठिनस्पर्शनाशे मृदुस्पर्शोनुभवात्तस्माद्रूपादिजनका विजातीयपाकाः यथाकार्यमुन्ने
या अतएव पार्थिवपरमाणुष्वेकजातीयत्वेपि पाकमहिम्ना विजातीयद्रव्यांतरानुभावः यथा गोभुक्तानां तृणादीनामापरमा
ण्वन्तंभंगात्तृणारंभकपरमाणुषु विजातीयतेजः संयोगात्पूर्वरूपादिचतुष्टयनाशे तदनंतरं दुग्धयोग्यहृद्यरूपादिकं वत्तेनेतदुत्पत्तेरे
वतां हृद्यरूपादिविशिष्टपरमाणुभिर्दुग्धद्व्यणुकमारभ्यते ततस्त्र्यणुकादिक्रमेण दुग्धारंभ इति एवं दुग्धारंभकैः परमाणु

तादृशरूपरसगंधस्पर्शजनकतेजः संयोगो जायते॥

न्या० बो० ४ प्रयोगः ज्ञानं विना शब्दप्रयोगासंभवात् शब्दप्रयोगः कारणं बुद्धिलक्षणमाह सर्वव्यवहारहेतुरिति व्यवहारः शब्दप्रयोगः ज्ञानं विना श
ब्दप्रयोगः ज्ञानं विना शब्दप्रयोगासंभवात् शब्दप्रयोगरूपव्यवहारहेतुत्वं ज्ञानस्य लक्षणं बुद्धिं विभजते स्मृतिरनुभवश्चेति
मा ३ स्मृतिं लक्षयति संस्कारेति संस्कारजन्यत्वविशिष्टज्ञानत्वं स्मृतेर्लक्षणं विशेषणानुपादाने प्रत्यक्षाद्यनुभवेऽतिव्याप्तिः तद्वा
रणाय विशेषणोपादानं संस्कारध्वंसेऽतिव्याप्तिवारणाय विशेष्योपादानम् ध्वंसं प्रति स्वप्रतियोगिनः कारणत्वात्संस्कार
ध्वंसेऽपि संस्कारजन्यत्वसत्त्वात् अनुभवं लक्षयति तद्भिन्नेति तद्भिन्नत्वे नाम स्मृतिभिन्नत्वे सति ज्ञानत्वमनुभव
लक्षणं तत्र विशेषणानुपादाने स्मृतावतिव्याप्तिः विशेष्यानुपादाने घटादावतिव्याप्तिः अतस्तद्वारणाय विशेषणविशेष्यो तः
रूपादानम् [redacted]
विशेष्यबोधरूपादानम् अनुभवं विभजते स द्विविध इति यथार्थानुभवं लक्षयति तद्वतीति तद्वतीत्यत्र सप्तम्यर्थो विशेष्य
ज्ञानर त्वं तत्त्वं च तत्प्रकारीभूतो धर्मो धर्मत्वम् तथा च तद्विशेष्यकत्वे सति तत्प्रकारकत्वं यथार्थानुभवस्य लक्षणम् उदाहरणं रज
ते इदं रजतमिति ज्ञानं रजतत्ववद्विशेष्यकत्वे सति रजतत्वप्रकारकं ज्ञानं तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्व रास

४

त्वलिंगिंद्रियमात्रेति अत्रापिमात्रपदं संख्यादिसामान्यगुणाश्रवत्तिव्याप्तिवारणाय अन्यविशेषणाकृत्यंपूर्ववद्बोध्यम्॥
ग्नाह्यत्वपरार्थोपि पूर्ववदेव प्रत्यक्षविषयत्वरूप एव बोध्यः रूपादिचतुष्टयं पृथिव्यांपाकजमिति एतत्तत्वनिर्णयस्त्वेत्थं पाको
नामविजातीयतेजस्संयोगः सचनानाजातीयः रूपजनकोविजातीयतेजस्संयोगः तदपेक्षयारसजनकोविजातीय एवंस्पर्शो
पितथैवैवंप्रकारेणभिन्नभिन्नजातीयाः पाकाः कार्यवैलक्षण्येनकल्पनीयाः यथाम्नस्यपुंजनिसिद्धे अत्राद्यावुक्तलक्षण
विजातीयतेजःसंयोगात्पूर्वहरितरूपनाशेनरूपान्तरस्यपीतादेरुत्पत्तिः पूर्वरसस्याम्लस्यैव अनुभवाद्धरितरूपस्यसत्वेपिरस
पराव्रत्तिदर्शनात्तेविजातीयतेजस्संयोगरूपवशात्पूर्ववत्साम्लरसनाशेनमधुररसस्यानुभवात्तस्माद्रूपजनकापेक्षयारसजनको
विलक्षणएवंगंधजनकोपिविलक्षणएवांगीकार्यः रूपरसयोरपराव्रत्तावपिपूर्वगंधनाशेविजातीयपाकवशात्त सुरभिगं
धोपलब्धेः एवंस्पर्शेपिपाकवशात्कठिनस्पर्शनाशेमृदुस्पर्शानुभवात्तस्माद्रूपादिजनकाविजातीयपाकाः यथाकार्यमुन्ने
या अतएवपार्थिवपरमाणुमेकजातीयत्वेपिपाकमहिम्नाविजातीयद्रव्यांतरानुभावः यथागोभुक्तात्तृणादीनामपरमा
स्वंतर्भेणोत्तृणारंभकपरमाणुषु विजातीयतेजःसंयोगात्पूर्वरूपादिचतुष्टयनाशेतदनंतरंदुग्धेयाद्दशारूपादिकंवर्त्ततेतद्दुत्तरंतैरि
वत्ताद्दशारूपादिविशिष्टपरमाणुभिर्दुग्धद्व्यणुकेमारम्यते ततस्त्र्यणुकादिक्रमेण दुग्धारंभइति एवंदुग्धारंभकैः परमाणु

ताद्दशारूपरसगंधस्पर्शजनकतेजःसंयोगोजायते॥

न्या० बो० ४ प्रयोगः ज्ञानं विना शब्दप्रयोगासंभवात् शब्दप्रयोगः कारणं बुद्धेर्लक्षणमाह सर्वेत्यादिनाहोवेति व्यवहारः शब्दप्रयोगः ज्ञानं विना श
ब्दप्रयोगः ज्ञानं विना शब्दप्रयोगासंभवात् शब्दप्रयोगरूपव्यवहारहेतुत्वं ज्ञानस्य लक्षणं बुद्धिं विभजते स्मृतिरनुभवश्चेति
मात्र२ स्मृतिं लक्षयति संस्कारेति संस्कारजन्यत्वविशिष्टज्ञानत्वं स्मृतेर्लक्षणं विशेषणानुपादाने प्रत्यक्षाद्यनुभवेतिव्याप्तिः तद्वा
रणाय विशेषणोपादानं संस्कारध्वंसेऽतिव्याप्तिवारणाय विशेष्योपादानम् ध्वंसप्रतिस्वप्रतियोगिनः कारणत्वात्संस्कार
ध्वंसेपि संस्कारजन्यत्वस्य सत्वात् अनुभवं लक्षयति तद्भिन्नेति तद्भिन्नत्वेनाम स्मृतिभिन्नत्वे सति ज्ञानत्वमनुभव
लक्षणं तत्र विशेषणानुपादाने स्मृतावतिव्याप्तिः विशेष्यानुपादाने घटादावतिव्याप्तिः अत्र वारणाय विशेषणविशेष्ययो
रुपादानम् [redacted]
ज्ञानत्वमनुभवलक्षणं तत्र विशेषणानुपादाने स्मृतावतिव्याप्तिः विशेष्यानुपादाने घटादावतिव्याप्तिः [redacted]
[redacted] अनुभवं विभजते स द्विविध इति यथार्थानुभवं लक्षयति तद्वतीति तद्वतीत्यत्र सप्तम्यर्थो विशेष्य
ज्ञानर त्वं तच्छब्देन प्रकारीभूतो धर्मो धर्मः तथा च तद्विशेष्यकत्वे सति तत्प्रकारकत्वं यथार्थानुभवस्य लक्षणम् उदाहरणं रज
ते इदं रजतमिति ज्ञानं रजतत्ववद्विशेष्यकत्वे सति रजतत्वप्रकारकं ज्ञानं तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्व

भिरेव द्व्यारम्भे तेपाकमहिम्ना एवं द्व्यारंभे कैरेव नवनीतारंभ इति दिक् विभागं लक्षयति संयोगेति संयोगनाशकत्वविशिष्ट
गुर गुणत्वं विभागस्य लक्षणं विशेषणमात्रोपादाने क्रियाया अपि संयोगनाशकत्वात् तत्रातिव्याप्तिवारणाय गुणत्व विशेष ५२
णम् गुरुत्वं लक्षयति आद्येति आद्यपतनक्रियायां वेगस्यैवासमवायिकारणत्वात् तत्रातिव्याप्तिवारणायाद्येत्युक्तं स्ने ५३
हे आद्यविशेषणमपि पूर्ववदेव योजनीयम् स्नेहं लक्षयति चूर्णादीति चूर्णादिपिंडीभावहेतुत्वे सति गुणत्वं स्नेहस्य लक्ष
भ णं पिंडीभावो नाम चूर्णादिधारणाकर्षहेतुभूतो विलक्षणः संयोगः तादृशसंयोगस्नेहस्यैव असाधारणकारणत्वं ननु जला
दिगतद्रवत्वस्य तथा सति दुग्धसुवर्णादिसंयोगेन चूर्णादिपिंडीभावापत्तेरतः स्नेह एव असाधारणकारणं विशेषणमात्रो
वृत्ति २ पादाने कालादावतिव्याप्तिवारणाय विशेष्योपादानं वस्तुतस्तु दुग्धजलसंयोगस्यैव पिंडीभावहेतुत्वे स्नेहस्य पिंडीभावहेतुत्वे
मानाभावात् जले द्रुतत्वे विशेषणात्त करकादिव्यावृत्तिः शब्दं लक्षयति श्रोत्रग्राह्येति शब्दत्वेऽतिव्याप्तिवारणाय गुणं
पदं रूपादावतिव्याप्तिवारणाय श्रोत्रेति स त्रिविधः संयोगजः विभागजः शब्दजश्चेति भेरीदंडसंयोगजन्यो भांकारादिशब्दः
हस्ततालसंयोगादिजन्यो मृदंगादिशब्दः वंशे पाट्यमाने दलद्वयविभागजन्यः पटपटादिशब्दः शब्दोत्पत्तिदेशमारभ्य क
र्णपर्यंतं निमित्तपवनेन शब्दधाराजायते तेनैवोत्तरशब्दे पूर्वशब्दः कारणं बुद्धेर्लक्षणमाह सर्वव्यवहारेति व्यवहारः शब्द

मितिनिष्कर्षः अन्यथा यथार्थे रजतरंगयोः रंगरजते इत्याकारसमूहालंबने भ्रमेतिव्याप्तिः तत्रापि रजतत्ववद्विशेष्यकत्वरज
तत्वप्रकारकत्वयोः रंगत्ववद्विशेष्यकत्वरंगत्वप्रकारकत्वयोः सत्वात् उक्तनिष्कर्षे तु रजतत्वप्रकारतायाः रजतत्ववद्रजतविशे
ष्यतानिरूपितत्वाभावात् रंगत्वप्रकारतायां रंगवद्विशेष्यतानिरूपितत्वाभावात् किंतु समूहालंबनभ्रमस्य रंगांशे रजतत्वा[illegible]
व[illegible]गाहित्वेन रजतत्वप्रकारतायाः रंगत्ववद्विशेष्यतानिरूपितत्वात् एवं रंगत्वप्रकारतायाः रजतत्ववत् विशेष्यतानिरूपितत्वाच्चे
ति अयथार्थानुभवं लक्षयति तदभाववतीति अत्रापि पूर्ववत् तदभाववद्विशेष्यतानिरूपितत्वे तन्निष्ठप्रकारताशालिज्ञानत्वं अ
न्यथा रंगरजते इत्याकारकसमूहालंबनप्रमायामतिव्याप्तिः एतत्समूहालंबनस्य रंगरजतोभयविशेष्यकत्वेन रजतत्वरंगत्वो
भयप्रकारकत्वेन च रजतत्वाभाववद्रंगविशेष्यकत्वेन रजतत्वरंगत्वोभयप्रकारकत्वेन च रजतत्वाभाववद्रंगविशेष्यकत्वरजत
त्वप्रकारकत्वयोः रंगत्वाभाववद्रजतत्वावगाहित्वेन रंगांशे रंगत्वावगाहित्वेन च रजते प्रकारतायाः रंगत्वाभाववद्रजतविशेष्यतानि त्व
रूपितत्वाभावान्नातिव्याप्तिः उदाहरणं [illegible]यथा शुक्ताविति [illegible]अनुभवं विभजते चतुर्विधस्तीति तत्करणमिति
फलमनुमतप्रत्यक्षादिकरणं चतुर्विधमित्यर्थः प्रत्यक्षादिचतुर्विधप्रमाणानां प्रमाकरणत्वे सामान्यलक्षणम् [illegible]
[illegible] एकैकप्रमाणलक्षणं तु वक्ष्यन्ते प्रत्यक्षज्ञाने त्यादिना करणलक्षणत्वे[illegible]मा[illegible] असाधारणमिति व्यापारवदसाधारणं

रंगत्वाभाववद्रजतविशेष्यकत्वेन

न्याय० धमित्यर्थः [redacted] असाधारणकारणत्वं च कार्यत्वव्याप्यधर्मावच्छिन्नकार्यतानिरूपितकारणताशालित्वमित्यर्थः यथादंडत्वं नं
घटं प्रत्यसाधारणत्वं कार्यत्वव्याप्यघटत्वादिरूपधर्मः तदवच्छिन्ना कार्यता घटे तन्निरूपितकारणता दंडे अतो घटं प्रति दंडो ऽसा
५ धारणकारणं भ्रम्यादिरूपव्यापारवत्वाच्च करणं साधारणत्वं च कार्यतावच्छिन्नकार्यतानिरूपितकारणताशालित्वमीश्वरादृष्टा
देः कार्यत्वावच्छिन्नं प्रतिएव कारणत्वात् साधारणत्वं कारणं लक्षयति कार्यनियतेति कार्यं प्रति नियतत्वे सति पूर्ववृत्तित्वं कारण
त्वम् नियतत्वविशेषणानुपादाने पूर्ववर्त्तिनो रासभादेरपि घटादिकारणत्वं स्यात् अतो नियतत्वे सतीति विशेषणम् नियतपूर्वव
र्त्तिनो दंडरूपादेरपि घटकारणत्वं स्यात् अतो नन्यथासिद्धपदमपि कारणलक्षणे निवेशनीयम् दंडरूपादीनां तु अन्यथासिद्धत्वात्
कार्यं लक्षयति प्रागिति प्रागभावप्रतियोगित्वं कार्यस्य लक्षणम् कार्योत्पत्तेः पूर्वमिह घटो भविष्यतीति प्रतीतिर्जायते एतत्प्रतीति
विषयो ऽभावः तत्प्रतियोगित्वं घटादिरूपं कार्यम् कारणं त्रिविधमिति समवायिकारणमसमवायिकारणं निमित्तकारणं चेति सम
वायिकारणं लक्षयति यत्समवेतमिति यस्मिन्समवेतं यत्समवायेन संबद्धं सत्कार्यमुत्पद्यते तत्समवायिकारणमित्यर्थः उदाहर
णं तंतव इति तंतुषु समवायेन संबद्धं सत्पटात्मकं कार्यमुत्पद्यत इति तंतवः समवायिकारणमित्यर्थः सामान्यलक्षणं तु समवायसं
बंधावच्छिन्नकार्यतानिरूपिततादात्म्यसंबंधावच्छिन्नकारणत्वं समवायिकारणत्वमिति समवायसंबंधेन घटाधिकरणे कपालादौ राम०
५

कपालादेस्तादात्म्यसंबंधेनैव सत्त्वात् समवायिसंबंधावच्छिन्नघटत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसंबंधावच्छिन्नकारणतायाः क
पालादौ सत्त्वात् लक्षणसमन्वयः जन्यभावत्वावच्छिन्नं प्रति तादात्म्यसंबंधेन द्रव्यस्यैव कारणत्वात् जन्यभावेषु द्रव्यगुणकर्मसु त्रिषु द्रव्य
मेव समवायिकारणं द्रव्ये द्रव्यावयवस्समवायिकारणं अतो गुणादावपि द्रव्यमेव समवायिकारणमित्याशयेनाह पटश्च स्वगतरूपा
देरिति समवायिकारणमित्यनुषज्यते असमवायिकारणं लक्षयति कार्येणेति कार्येण सहैकस्मिन्नर्थे समवेतं सत्कारणमसमवा
यिकारणमित्यन्वयः जन्यद्रव्यमात्रे अवयवसंयोगस्यासमवायिकारणत्वात् पटात्मककार्ये तदवयवतंतुसंयोगस्यैव असमवायिकारण
त्वमिति दर्शयति यथा तंतुसंयोगः पटस्येति पटात्मककार्येण सहैकस्मिन्नर्थे तंतौ समवेतं सत्समवायेन वर्तमानं सत्पटात्मककार्यं प्रति
[redacted] तंतुसंयोगात्मकं कारणं समवायिकारणमित्यर्थः द्वितीयमसमवायिकारणं दर्शयति कारणेन सहेत्यादिना प्रदर्शितं यच्च तदु
दाहरति तंतुरूपमिति कारणेन सह पटरूपकारणीभूतेन पटेन सहैकस्मिन्नर्थे तंतुरूपार्थे समवेतं सत्समवायसंबंधेन वर्तमानं सत्तंतुरूपं प
टरूपं प्रति कारणं भवत्यतोऽसमवायिकारणं तंतुरूपं पटरूपस्य सामान्यलक्षणं तु समवायसंबंधावच्छिन्नकार्यतानिरूपितायाः समवाय
संबंधावच्छिन्नकपालद्वयसंयोगनिष्ठकारणता कपालद्वयसंयोगे वर्तते एवमाद्यपतनस्पंदनक्रियायां च गुरुत्वद्रवत्वे ऽसमवायि
कारणे भवतः आद्यपतनक्रियां प्रत्याद्यस्पंदनक्रियां प्रति च समवायसंबंधेनैव तथा कारणत्वात् अवयविगुणादौ त्ववयवगुणादेः

न्याय०
६

स्वसमवायिसमवेतत्वसंबंधेनैवकारणत्वात्तत्तत्संबंधावच्छिन्नकारणताश्रयत्वमयवगुणादौ वर्तते अवयमगुणभूतकपालतंतुरू
पादेः स्वशब्दस्याहंकपालरूपतंतुरूपसमवायिकपालतंतुसमवेतत्वसंबंधेन घटपटादौ कपालरूपतंतुरूपयोः सत्वात् तदुभयभि
न्नमितिसमवाय्यसमवायिभिन्नकारणमित्यर्थः वदेतदिति पदसाधारणमिति व्यापारवत्वे सतीत्यपि परणीयं अन्यथातंतुकपा
लसंयोगयोरतिव्याप्तिः तंतुकपालसंयोगयोरपिप्ररणीयं अन्यथातंतुनारिक्तपटघटत्वावच्छिन्नप्रतिकारणत्वादसाधारत्वम
स्त्येवेति अतस्तत्रकारणत्ववारणायव्यापारवत्वे सतीतिकरणलक्षणे विशेषणं देयम् व्यापारत्वंचतज्जन्यत्वे सति तज्जन्यकत्वं
भवतिहिदंडजन्यत्वेसतिदंडजन्यघटजनकत्वाभ्रम्यादेः अतोदंडव्यापारत्वं एवं कपालसंयोगतंतुसंयोगादेरपि कपालतंतुव्याप
रत्वंकपालतंतुसंयोगयोः कपालजन्यत्वे तंतुजन्यत्वे सतितज्जन्यघटपटजनकत्वात् करणलक्षणे असाधारणविशेषणानुपादा
नेईश्वरादृष्टादेरपिव्यापारवत्वात्कारणत्वंस्यात् तत्रातिव्याप्तिवारणायासाधारणेतिषड्विधेंद्रियभूतप्रत्यक्षप्रमाणस्यलक्षणमा
ह तत्रेति प्रमाणभूतेषुप्रत्यक्षात्मकंयज्ज्ञानं चाक्षुषादिप्रत्यक्षंतत्प्रतिकारणंव्यापारवदसाधारणमिंद्रियंभवति अतः प्रत्य
क्षज्ञानकारणत्वं प्रत्यक्षलक्षणं आद्यसन्निकर्षातिरिक्तचतुर्विधसन्निकर्षाणां समवायिघटितत्वेनेंद्रियजन्यत्वाभावाद्व्यापार
त्वंनसंभवतीतींद्रियमनः संयोगस्यैव षड्विधप्रत्यक्षजननीये इंद्रियव्यापारताबोध्या प्रत्यक्षप्रमाणलक्षणमुक्तं प्रत्यक्षप्रमा

राम०
६

[illegible]माह ज्ञानकरणमिति प्रत्यक्षप्रमाणमुक्तं ज्ञानं व्याप्तिज्ञानं सादृश्यज्ञानं पदज्ञानं च तदेव करणं [illegible] ननु ज्ञानस्य करणत्व
म् इदं लक्षणमीश्वरप्रत्यक्षसाधारणं ईश्वरीयप्रत्यक्षस्याजन्यत्वात् ननु ज्ञानस्य करणत्वम् इदं लक्षणमीश्वरप्रत्यक्षसाधारणं
लक्ष्यत्वाभिप्रायेणोत्तरमाह इंद्रियार्थसन्निकर्षेति जन्यप्रत्यक्षस्यैव लक्ष्यत्वाभिप्रायेदं लक्षणं प्रत्यक्षं विभजते निर्विकल्पकमिति
प्रकारताशून्यज्ञानत्वमेव निर्विकल्पके च तुर्थो विषयताख्योऽङ्गीक्रियते ननु त्रिविधविषयतामध्ये कापि तत्राऽतो विशेषणताश्रयत्वं वि
शेष्यताशून्यत्वं च सन्निकर्षे ताभ्यन्यत्वमित्यर्थे पलक्षणासंभवन्ति सप्रकारकमिति विषयतायाः ज्ञाननिरूपितत्वात् ज्ञानस्य विष
यतानिरूपकत्वेन प्रकारतानिरूपकज्ञानत्वं सविकल्पकलक्षणं उदाहरणं यथेति इदंत्वावच्छिन्नविशेष्यतानिरूपितडित्थत्वप्र
कारताशालिज्ञानं ब्राह्मणत्वप्रकारताशालिज्ञानं च सविकल्पकमित्यर्थः चाक्षुषादिषड्विधप्रत्यक्षकारणीभूतान् षड्विधसन्नि
कर्षान् विभजते संयोग इत्यादिना द्रव्यवृत्तिलौकिकविषयतासंबंधेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयोगः कारणं द्रव्यसमवे
तसमवेतवृत्तिलौकिकविषयतासंबंधेन चाक्षुषं प्रति चक्षुःसंयुक्तसमवायस्य हेतुत्वं द्रव्यग्राहकाणीन्द्रियाणि चक्षुस्त्वचावानौ
सिद्धो एयेव अन्यानि घ्राणरसनश्रवणानि तु गुणग्राहकाणि अतस्त्वगिंद्रियस्यले द्रव्यवृत्तिलौकिकविषयतासंबंधेन त्वा
चत्वावच्छिन्नं प्रति त्वक्संयोगस्य हेतुत्वं एवं द्रव्यसमवेतत्वाचत्वावच्छिन्नं प्रति त्वक्संयुक्तसमवायस्य हेतुत्वात् द्रव्यसमवेतोष्णत्वशी

न्याय॰ ७ नत्वादिजातिस्पर्शेनप्रत्यक्षे त्वक्संयुक्तसमवायस्य हेतुता आत्मसमवेतसुखत्वादिमानसप्रत्यक्षे मनसः संयुक्तसमवेतसमवायस्य
हेतुता रसनघ्राणयोस्तु रसगंधगतजातिग्राहकत्वेन द्वितीयतृतीययोः सन्निकर्षयोरेवात्र हेतुता वाच्या श्रवणेंद्रिय
स्याकाशरूपत्वेन शब्दस्याकाशगुणत्वेन च श्रोत्रेंद्रियेण च समं शब्दस्य समवायसन्निकर्षः शब्दवृत्तिशब्दत्वगत्वघत्वादिजा
तिविषयकश्रावणप्रत्यक्षे समवेतसमवायस्य हेतुता अभावप्रत्यक्षे विशेषणभावो नाम विशेष्यता सन्निकर्षः शब्दवृत्तिशब्दत्वगत्व
पंचसन्निकर्षेष्वपि विशेषणता योजनीयाः तथाहि द्रव्याधिकरणकाभावप्रत्यक्षे इंद्रियसंयुक्तसमवेतसमवेतविशेषणता
द्रव्यसमवेतसमवेताधिकरणकाभावप्रत्यक्षे इंद्रियसंयुक्तसमवेतसमवेतविशेषणता संयोगस्थाने समवायस्थाने च संयु
क्तपदं समवेतपदं च घटयित्वा अभावप्रत्यक्षस्थाने निर्वाह्यं यथा घटद्रव्यसमवेतं घटत्वं पृथिवीत्वादिकं रूपादिकं च तत्र नीलादौ
पीतत्वाभावः घटत्वादिजातौ पटत्वाभावश्च वर्त्तते स चाभावः संयुक्तसमवेतविशेषणतासन्निकर्षेण गृह्यते एवं नीलत्वादिजातौ
पीतत्वाभावोपींद्रियसंयुक्तसमवेतसमवेतविशेषणतासन्निकर्षेण गृह्यते पटसमवेतं नीलं तत्समवेतं नीलत्वं तद्विशेषणता
पीतत्वाभावे वर्त्तत इति संक्षेपः इति श्रीमत्स्वपुरस्थसकलविद्वन्मुकुटमाणिक्यश्रीगोवर्द्धनकृतायां तर्कसंग्रहव्याख्यायां न्या
यबोधिन्याख्यायां प्रत्यक्षपरिच्छेदः अथ चरमवर्णोद्देशसमर्थी अनुमानं लक्षयति अनुमितीति अनुमित्यां व्याप्तिज्ञानं जन्यत्वा एम॰ ७

व्याप्तिज्ञानजन्यानुमितिजनकत्वाच्च तज्जन्यत्वे सति तज्जनकत्वरूपव्यापारलक्षणमुपपन्नं अनुमितिकरणत्वमनुमानस्य लक्ष
णम् अयं अनुमाने च व्याप्तिज्ञाने एतस्य परामर्शरूपव्यापारद्वारानुमितिं प्रत्यसाधारणकारणतया अनुमितिकरणत्वमुपपन्नं
परामर्शजन्यत्वे सतीति सतिसप्तम्या विशिष्टत्वमर्थः परामर्शजन्यत्वविशिष्टज्ञानत्वमनुमितेर्लक्षणम् तत्र ज्ञानत्वमात्रोपादाने
प्रत्यक्षादावतिव्याप्तिः अतस्तद्वारणाय परामर्शजन्यत्वे सतीति विशेषणोपादाने विशेषणमात्रोक्तौ तद्ध्वंसेऽतिव्याप्तिः अतो ज्ञान
त्वोपादानम् व्याप्तिविशिष्टेति व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः व्याप्तिविशिष्टं च तत्पक्षधर्मताज्ञानं चेति कर्मधारयाद्वि
शिष्टपदस्य प्रकारिपरत्वात् पक्षधर्मताज्ञानमित्यत्र षष्ठ्या विषयत्वबोधनात् पक्षधर्मतापदस्य पक्षसंबंधार्थकत्वाच्च कर्मधा
रयसमासे समस्यमानपदार्थयोरभेदसंसर्गलाभेन व्याप्तिप्रकारकाभिन्नं पक्षसंबंधविषयकं ज्ञानं तत्परामर्श इति लभ्यते एवं
मतिधर्मो वन्हिव्याप्यः घटवान्पर्वत इति समूहालंबने परामर्शलक्षणं लगवितद्वारणाय पक्षविशेष्यतानिरूपिता या हेतु
प्रकारता तन्निरूपिता व्याप्तिनिष्ठप्रकारताशालि ज्ञानं परामर्श इति निष्कर्षः एतादृशपरामर्शजन्यत्वे सति ज्ञानत्वम
नुमितेर्लक्षणम् अनुमितिपरामर्शयोर्विशिष्यकार्यकारणभावश्चेत्थं पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितसंयोगसंबं
धावच्छिन्नवन्हित्वावच्छिन्नविधेयताकानुमितित्वावच्छिन्नं प्रति वन्हिव्याप्तिप्रकारतानिरूपिता यो धूमत्वावच्छिन्ना

न्याय० १८

प्रकारतानिरूपिताया पर्वतत्वावच्छिन्नाविशेष्यतानात्मकशाब्दनिर्णयः कारणमिति स च निर्णयः वन्हिव्याप्यधूमवान्पर्वत इ
त्याकारकः यत्र यत्रेति पूर्वपदे वीप्सावशात् धूमाधिकरणे यावंति वन्हिमत्त्वलाभात् पावेत्यदमहिम्ना धूमव्यापकत्वे वन्हे
तत्साहचर्यं नाम सामानाधिकरण्यं तथा च धूमव्यापकवन्हिसामानाधिकरण्यं व्याप्तिरित्यर्थः अत्र धूमव्यापकत्वं नाम धू
मसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकधर्मवत्त्वं तादृशधर्मो वन्हौ वन्हित्वम् तथाहि धूमाधिकरणपर्वतमहान
सचत्वरादौ वर्त्तमानो योऽभावः घटत्वावच्छिन्नप्रतियोगिताकोऽभावः न तु वन्हित्वावच्छिन्नप्रतियोगिताकाभावः कुतः पर्व
तादौ वन्हेः सत्वात् एवं सति धूमाधिकरणे पर्वतचत्वरादौ वर्त्तमानस्य घटाभावस्य प्रतियोगितावच्छेदकं घटत्वं पटाभावस्य
प्रतियोगितावच्छेदकं पटत्वं अनवच्छेदकं वन्हित्वं तादृशवन्हित्वं वन्हौ वर्त्तते अतः धूमव्यापकत्वं वन्हौ वर्त्तत इतीयमन्व
यव्याप्तिः सिद्धांतानुसारेण पूर्वपक्षीया व्याप्तिस्तु साध्याभाववद्वृत्तित्वं साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छे
दकावच्छिन्नप्रतियोगिताकाभाववन्निरूपितं यद्धेतुतावच्छेदकसंबंधावच्छिन्नवृत्तित्वं तादृशवृत्तित्वावच्छिन्नप्रति
योगिताकोऽभावो व्याप्तिः तच्च केवलान्वयिन्यव्याप्तमिति सिद्धांतानुसारेण द्रष्टव्यम् स्वार्थानुमानं नाम न्यायाप्रयोज्यानुमा
नं न्यायप्रयोज्यानुमानं परार्थानुमानं न्यायत्वं च प्रतिज्ञादिपंचकसमुदायत्वं अवयवत्वं प्रतिज्ञाद्यन्यतमत्वं अन्वयेति ॥ राम०

८

व्यापकसमानाधिकरणव्याप्तिमानित्यर्थः व्यतिरेकेणेति व्यतिरेकोभावः तथाचसाध्याभावहेत्वभावयोर्व्यतिरेकस्यव्या
प्तिः इयंचयत्रयत्रवन्ह्यभावः तत्रतत्रधूमाभावइतियत्रपदवीप्सयावन्ह्यभाववत्तियावत्तिधूमाभावस्यहेतुयावंत
दस्य व्यापकपरतयाधूमाभावेवन्ह्यभावव्यापकत्वंलब्धं एवंचवन्ह्यभावनिष्ठव्याप्तेः स्वाश्रयीभूतवन्ह्यभावव्यापकीभू
ताभावप्रतियोगित्वसंबंधेनधूमनिष्ठतयागृहीतव्यतिरेकित्वे न धूमव्यापकवन्हिसामानाधिकरण्यरूपान्वयव्याप्तिम
त्वेनान्वयित्वेनगीयते॥ व्यतिरेकेपिरामर्शस्तुवन्ह्यभावव्यापकीभूताभावप्रतियोगिधूमवान्पर्वत इत्याकारकः व्यतिरे
कव्याप्तिसत्त्वेसत्यन्वयव्याप्तिमत्त्वंकेवलान्वयित्वं साध्येकेवलान्वयित्वमत्यंताभावाप्रतियोगित्वंतथाचाभावा
प्रतियोगि[redacted]साध्यव्यापकत्वंकेवलान्वयीतिमूलकारोक्तलक्षणमुपपन्नं अत्यंताभावाप्रतियोगि
त्वं केवलान्वयित्वंनचैवंयोगाभावेकालाभावेचाव्याप्तिरितिवाच्यंविरोधित्व ति[illegible]मदत्यंताभावप्रतियोगित्वस्यत
दर्थत्वात् एकजातीयसंबंधेनसर्वत्रविद्यमानत्वंकेवलान्वयित्वमितिनव्याः अन्वयव्याप्तिशून्यत्वे सतिव्यतिरेक
व्याप्तिशून्यत्वेसतिव्याप्तिमत्त्वंकेवलव्यतिरेकित्वम् यथापृथिवीति अत्रपृथिवीत्वावच्छिन्नेपक्षः पृथिवीतरजलाद्यष्टभे
दः साध्यः गंधवत्त्वंहेतुः अत्रयद्यद्गंधवत्तदितरभेदवदित्यन्वयदृष्टान्ताभावात् गंधव्यापकेतरभेदसामानाधिकरण्यरूपा

न्याय॰
६

न्वयव्याप्तिग्रहासंभवात् किंतु यत्र यत्रेतरभेदाभावस्तत्र तत्र गंधाभावः यथा जलादिकमिति व्यतिरेकदृष्टांते मूले जला
दाविनरभेदाभावः रूपसाध्याभावव्यापकतागंधाभावे दृश्यते इममेवार्थं मनसि निधाय यत्नेतरेभ्यो भिद्यते न तद्गंध
वत् यथा जलमिति ग्रंथेन मूलकारो व्यतिरेकव्याप्तिमेव प्रदर्शितवान् एवं व्यतिरेकव्याप्तिग्रहानंतरं इतरभेदाभावव्या
पकीभूताभावप्रतियोगिगंधवती पृथिवीत्याकारकव्यतिरेकपरामर्शात् पृथिवीत्वावच्छिन्नोद्देश्यतानिरूपितेत
रभेदत्वावच्छिन्नविधेयताक पृथिवीतरभेदवतीत्याकारानुमितिर्जायत इति तत्त्वं यथाश्रुतमूलार्थस्तु यथा जल
मिति जलमितरभेदाभाववदिति नचेयं तथेति इतरभेदाभावव्यापकत्वाभाववती न किंतु तदभावगंधवतीत्यर्थः त
स्मान्न तथेति तच्छब्देन गंधाभावाभावस्वरूपस्य गंधस्य परामर्शेन तस्मादिति पंचम्यंतात् गंधाभावाभाववत्त्वादिस्य
र्थोपलब्धेः तथा इतरभेदाभाववत् न जलं तस्याभावः तथा चेतरभेदाभावाभाववती इतरभेदवतीत्यर्थः संदिग्धसा
ध्येति साध्यप्रकारकसंदेहविशेष्यत्वं पक्षत्वं अनुमितेः पूर्वं साध्यसंदेहो नियमेन जायत इत्यभिप्रायेणाइदं लक्षणं
प्राचीनैः कृतं गगनविशेष्यकमेघप्रकारकसंदेहाभावदशायामपि गृहमध्यस्थपुरुषस्य घनगर्जितश्रवणेन गगनं
मेघवदित्याकारकानुमितिर्जायते गगनत्वावच्छिन्नोद्देश्यतानिरूपितमेघत्वावच्छिन्नविधेयताकानुमितिदर्शना एम॰
६

प्राचीनमतं विहाय नवीनैरनुमित्युद्देश्यत्वं पक्षत्वमिति स्वीकृते तेनिश्चितसाध्ये तिसाध्यप्रकारकनिश्चयविशेष्यत्वे विपक्षत्वं
निश्चयो वन्ह्यभाववानिसाकारकनित एवं सद्धेतुनिरूपणे हेत्वाभावान्निरूपयति सव्यभिचारेति हेतुवदवभासंते इति हेत्वाभासा
: दुष्टहेतव इत्यर्थः दोषाश्च व्यभिचारविरोधसत्प्रतिपक्षासिद्धिबाधाः एतद्दोषविशिष्टहेतव इत्यर्थः हेतौ दोषज्ञाने सत्यनुमितिप्र
तिबंधो जायते व्याप्तिज्ञानप्रतिबंधो वा जायते अतो वादिनिग्रहार्थं वादिनुद्भावितहेतौ दोषोद्भावनार्थं दुष्टहेतुनिरूपणमित्य
र्थः पर्वतो वह्निमान्प्रमेयत्वादित्यत्र प्रमेयत्वहेतौ वन्ह्यभाववद्वृत्तित्वरूपव्यभिचारज्ञाने वन्ह्यभाववद्वृत्तित्वरूपव्याप्तिग्रहप्रति
बंधः फलम् निश्चितसाधावद्वृत्तित्वं साध्यवद्वृत्तित्वं च साध्यासमानाधिकरण्यं हेतौ साध्यासामानाधिकरण्ये निश्चि
ते साध्यसामानाधिकरण्यरूपव्याप्तिज्ञानप्रतिबंधः अपफले अनुपसंहारिणं लक्षयति अन्वयेति उभयत्र दृष्टांताभावादन्वयव्या
प्तिज्ञानव्यतिरेकव्याप्तिज्ञानोभयसामग्रीनास्तीत्यर्थः पक्षातिरिक्तामसिद्धेरिति भावः विरुद्धं लक्षयति साध्याभावव्या
प्य इति तथा च साध्याभावव्याप्यहेतुप्रकारकज्ञानात् पक्षविशेष्यकसाध्यप्रकारकानुमितिप्रतिबंधः फलम् एवं सत्प्र
तिपक्षेपि विरुद्धसत्प्रतिपक्षयोर्विशेषस्तु विरुद्धहेतोरेकत्वेन सत्प्रतिपक्षे हेतोर्द्वित्वेन च ज्ञातव्यः सत्प्रतिपक्षे द्वौ हेतू
विरुद्धे एको हेतुरिति यावत् साध्याभावसाधकहेतुः साध्यसाधनत्वेनोपन्यस्त इत्यसामर्थ्यसूचनमपि भवति आश्रयासि

द इति पक्षतावच्छेदकविशिष्टपक्षाप्रसिद्धिः यथा गगनीयत्वविशिष्टपक्षाप्रसिद्धेः सौरभ्यानुमितिर्न संभवति स्वरूपासिद्धिर्नाम पक्षे हे
त्वभावः तथा च हेत्वभावविशिष्टपक्षज्ञानात् तद्विशेष्यकहेतुप्रकारपरामर्शानुत्पादः परामर्शप्रतिबंधः फलम् व्याप्यत्वासिद्धिरिति
प्रकृते तु धूमव्यापकत्वं आर्द्रेंधनेन गृहीतं चेत् धूमे आर्द्रेंधनव्याप्यत्वं गृहीते एवं वन्हिव्यापकत्वं आर्द्रेंधने गृहीतं चेत् वन्हौ तद्व्या
प्यत्वं गृहीतं तत्र देव व्यभिचारित्वम् तथा चोपाधिव्यभिचारित्वं साधने गृहीतं चेत् उपाधिभूतार्द्रेंधनसंयोगव्याप्यधूमव्यभिचा
रित्वं साधने गृहीतमेव अनुमानप्रकारश्च पूर्वानुमानहेतुपक्षीकृतवन्हिर्धूमव्यभिचारी धूमव्यापकार्द्रेंधनव्यभिचारि
त्वात् घटत्वादिवत् यो यत्साध्यव्यापकव्यभिचारी स सर्वोपि साध्यव्यभिचारी एवं प्रकारेण प्रकृतानुमानहेतुभूते पक्षे साध्य
व्यभिचारोत्पादकतया दूषकत्वमुपाधेः फलं तथा च धूमाभाववद्वृत्तित्वरूपधूमव्यभिचारे गृहीते वन्हौ धूमाभाववद्वृत्तित्वरू
पव्याप्तिग्रहप्रतिबंधः फलं यस्येति यस्य हेतोः साध्याभावः स च प्रमाणान्तरेण निश्चितः तथाच प्रात्यक्षेहि कृसाध्याभावश्चि नि
येनानुमितिप्रतिबंधः फलम् इति श्रीगोवर्द्धनकृतायां तर्कसंग्रहव्याख्यायां न्यायबोधिन्यां अनुमानपरिच्छेदः संपूर्णः
उपमानं लक्षयति उपमितीति उपमितिलक्षणमाह संज्ञासंज्ञीति संज्ञापदं संज्ञ्यर्थः तयोः सम्बन्धान्तरं शक्तिः तथाच पदा
र्थसंबंधज्ञानमुपमितिरित्यर्थः उपमानमतिदेशवाक्यार्थज्ञानम् अतिदेशवाक्यार्थस्मरणं व्यापारः गोसदृशो गवयप

दृष्टास्मदस्याकारमात् गोसदृशत्वावच्छिन्नविशेष्यकगवयपदवाच्यत्वप्रकारकज्ञानं जायते तदेव करणम् इति श्रीमत्समस्तवि
द्वन्मुकुटश्रीगोवर्द्धनकृतायां तर्कसंग्रहव्याख्यायां न्यायबोधिन्याम् उपमानपरिच्छेदः समाप्तिसंगात् शब्दं लक्षयति आप्तेति
पदज्ञानं करणं व्याप्तिज्ञानसहकृतपदज्ञानकरणजन्यपदार्थोपस्थितिर्व्यापारः वाक्यार्थज्ञानं फलं तच्छाब्दबोधः वृत्तिर्नाम श
क्तिलक्षणान्यतररूपा शक्तिर्नाम घटादिविशेष्यकघटादिपदजन्यबोधविषयत्वप्रकारक ईश्वरसंकेतः ईश्वरसंकेतो नाम ईश्व
रेच्छा सैव शक्तिरित्यर्थः शक्तिनिरूपकत्वमेव पदे शक्तत्वं विषयतासंबंधेन शक्त्याश्रयत्वं शक्यत्वं शक्यसंबंधो लक्षणा सा द्वि
धा गौणी शुद्धा चेति गौणी नाम सादृश्यविशिष्टे लक्षणा यथा सिंहो माणवक इत्यादौ सिंहपदस्य सिंहसादृश्यविशिष्टे लक्ष
णा शुद्धापि द्विविधा जहल्लक्षणा अजहल्लक्षणा चेति लक्ष्यतावच्छेदकरूपेण लक्ष्यमात्रबोधिका जहल्लक्षणा यथा गंगायां घो
षः इत्यत्र गंगापदशक्यप्रवाहसंबंधस्य तीरे सत्त्वात् तादृशशक्यसंबंधरूपलक्षणया गत्वा गंगापदात् तीरोपस्थितिः लक्ष्यतावच्छे
दकरूपेण लक्ष्यशक्योभयबोधप्रयोजिका अजहल्लक्षणा यथा काकेभ्यो दधि रक्ष्यताम् इत्यादौ काकपदस्य दध्युपघातके लक्ष
णा लक्ष्यतावच्छेदकत्वं दध्युपघातकत्वं तेन रूपेण दध्युपघातकानां काकविडालकुक्कुटसारमेयादीनां सर्वेषां च बोधात् ज
हदजहल्लक्षणा वेदान्तिनां मते आकांक्षा चेति अव्यवहितोत्तरत्वादिसंबंधेन यस्य यत्पदप्रकारकज्ञानव्यतिरेकप्रयुक्तो यादृशान्व

माय० ११

बोधाभावः तादृशशब्दबोधे तत्पदार्थस्य तत्त्वमाकांक्षा तादृशाकांक्षाज्ञानं शाब्दबोधे कारणं अर्थाबोध इति बाधाभावो योग्यतेत्य
र्थः अग्निना सिंचेदित्यत्र सेककरणत्वस्य जलादिधर्मस्य वह्नौ बाधनिश्चयसत्त्वात् तादृशवाक्यात् शाब्दबोधो न संभवति आ
सत्तिं निरूपयति पदानामिति असहोच्चारितानि विलंबेनोच्चारितानि वैदिके वेद इत्यर्थः इदमुपलक्षणम् वेदमूलकस्मृत्या
दौस्वपि वाक्यानि लौकिक इति आप्तत्वं प्रयोगहेतुभूतयथार्थज्ञानवत्त्वम् यथार्थानुभवं निरूप्यायथार्थानुभवं विभजते
संशयेत्यादिना एकेति एकधर्मावच्छिन्नविशेष्यतानिरूपितभावाभावप्रकारकज्ञानं संशय इत्यर्थः विपर्ययो नाम भ्र
म इत्यर्थः व्याप्यारोपेणेति तर्के व्याप्यस्य व्यापकस्य च व्यतिरेकनिश्चयप्रकारणम् अन्यथा बाधनिश्चयाभाव इत्येतत्त्रि
दोषे तर्कानुपपत्तेः सुखं निरूपयति अनुकूलेति इतरेच्छानधीनेच्छाविषयत्वमिति निष्कर्षः यथाश्रुते अनुकूलत्वप्र
कारकवेदनीयत्वस्य वेदनाविशेष्यत्वस्य घटेऽनुकूल इत्याकारकज्ञानदशायां अनुकूलत्वप्रकारकज्ञाने विशेष्यत्व
स्य घटादावपि सत्त्वात् घटादावतिव्याप्तिरिति विवक्षा सुखमुक्ते भोजनादावति व्याप्तिवारणाय इतरेच्छाऽनधीनेति इच्छा
विशेषणम् सुखेच्छायाः सुखत्वप्रकारकज्ञानमात्रजन्यत्वात् दुःखं निरूपयति प्रतिकूलेति अत्रापीतरद्वेषानधीन
द्वेषविषयत्वमिति निष्कर्षः लक्षणं द्वेषविषयत्वमात्रोक्तौ सर्पादावतिव्याप्तिस्तद्वारणायेतरद्वेषानधीनेति द्वेषविशेषणम् एम०

११

दुःखादौ द्वेषात्सर्पे विद्वेष इति सर्पे सस्य सर्पजन्यदुःखजन्यद्वेषविषयत्वात् अन्यद्वेषानधीनद्वेषविषयत्वस्य दुःखत्व
सर्पादौ नातिव्याप्तेः द्वेषः धर्माधर्मौ निरूपयति विहितेति वेदविहितेत्यर्थः निषिद्धेति वेदनिषिद्धेत्यर्थः बुध्यादयोष्टावि
त बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा इत्यर्थः संस्कारं विभजते संस्कारेति कर्म निरूपयति चलनात्मकमिति सामान्यं नि
रूपयति नित्यमनेकानुगतमिति नित्यत्वे सत्यनेकसमवेतत्वं जातेर्लक्षणमित्यर्थः नित्यत्वविशेषणानुपादाने अनेकसमवे
तत्वमात्रोपादाने संयोगादावतिव्याप्तिः तत्रापि अनेकद्रव्यसमवेतत्वस्य सत्वात् तद्वारणाय नित्यत्वोपादानं अनेके
समवेतत्वानुपादाने नित्यमात्रोपादाने आकाशादावतिव्याप्तिस्तद्वारणाय अनेकसमवेतत्वविशेषणं अनेकसम
वेतत्वानुपादाने नित्यत्वविशिष्टसमवेतत्वमात्रोक्तावाकाशगतैकत्वपरिमाणादौ जलपरमाणुगतरूपादौ चातिव्याप्तिः
जलपरमाणुगतरूपादेराकाशगतैकत्वपरिमाणादेर्नित्यत्वात्समवेतत्वाच्चातोऽनेकेति समवेतविशेषणम् समवा
यं निरूपयति नित्येति संबंधत्वं विशिष्टं प्रतीतिनियामकत्वम् तावन्मात्रोक्तौ संयोगेऽतिव्याप्तिरतो नित्येति विशेषण
म् प्रागभावं निरूपयति अनादीति ध्वंसं निरूपयति सादीति अत्यन्ताभावं निरूपयति तादात्म्येति सर्वेषामपीति प्रमाण
प्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासछलजातिनिग्रहस्थानानां तत्वज्ञाना
न्निःश्रेयसाधिगम इति न्यायस्यादिमसूत्रे उक्तानां प्रमाणप्रमेयादीनां नामपीत्यर्थः विस्तरस्त्वन्यत्रानुसंधेयः इति श्री

१२

विरे
हेवकि